~~।श्री॥ ११७१॥~~

याशी उ प्रयोग

संस्कृत

ग्रं. ५५

~~मंजरी~~

त्रुटित.

३३५२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

यादि

# ॥अथकृत्यमंजरीअनुक्रमणिकाप्रारंभः॥

Joint project of Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(2)

अनुक्रम ॥१॥

| | | | | | |
|---|---|---|---|---|---|
| | श्रीगणेशायनमः॥ अथकृत्य | ७ | व्यतीपातेसुवर्णदानविधि· | ११ | ज्येष्ठशुद्द१० दशहरानिर्ण· |
| | मंजर्याः अनुक्रमणिकारंभः॥ | ८ | सामान्यसंक्रांतिनिर्णयः | १२ | ज्येष्ठशुक्लनिर्जलैकादशीनि· |
| २ | संवत्सरप्रतिपदानिर्णयः | ९ | तिथिपालनव्रतनिर्णयः | १२ | निर्जलैकादशीवचनानि |
| ३ | संवत्सरमध्येसाडेतीनमुहूर्ताः | | इतिचैत्रमासकृत्यानि | १२ | एकादशीपारणानिर्णयः |
| ३ | चैत्रमासिनित्यकुंभदान· | | अथवैशाखमासः | १२ | हरिवासरनिर्णयः |
| [illegible] | गौरीतृतीयानिर्णयः | ९ | वैशाखस्नानविधिः | १२ | ज्येष्ठपौर्णिमावटसावित्री |
| [illegible] | चैत्रशुक्लत्र· मत्स्यजयंती | १० | अक्षय्यतृतीयानिर्णयः | १३ | मिथुनसंक्रांतिनि· |
| ३ | चैत्रशुक्लतृतीयानिर्णयः | ११ | इयमेवतृतीयापरशुरामजं· | | इतिज्येष्ठमासकृत्यानि |
| ३. | चैत्रशुक्लाष्टमीनिर्णयः | ११ | वैशाखशुक्ल...सिंहजयं· | | अथाषाढमासकृत्यानि |
| ४ | चैत्रशुक्लरामनवमीनि· | ११ | वैशाखीपौर्णिमानिर्णयः | १३ | आषाढशुक्लैकादशीविष्णुशयनी |
| ५ | दोलोत्सवनिर्णयः | | इतिवैशाखकृत्यानि | १४ | चातुर्मास्यव्रतारंभादि |
| ५ | दमनारोपणविधिः | | अथज्येष्ठमासः | १३ | आषाढशुक्ल१२ निर्णयः |

॥१॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)


| | | | | | |
|---|---|---|---|---|---|
| ९४ | शाकव्रतादिनिर्णयः | ९८ | श्रावणशुक्लनागपंचमी | ३० | भाद्रशुक्लपंचमीऋषिपूजना· |
| ९५ | दुग्धव्रतनिर्णयः | ९९ | श्रावणशुक्लद्वादश्यांपवित्रारोप· | ३१ | भाद्रशुक्लषष्ठीयोगविशेषेचंपा· |
| ९५ | द्विदलव्रतनिर्णयः | २९ | श्रावणपौर्णमास्यांरक्षाबंध· | १०३ | भाद्रशु·५ सूर्यस्कंदषष्ठी |
| ९६ | आमिषलक्षणं | १०० | उत्सर्जनोपाकरणनिर्णयः | १०४ | भाद्रशुक्लदूर्वाष्टमीनि· |
| ९६ | हविष्येभक्ष्यनिर्णयः | २९ | श्रावणकृष्णजन्माष्टमीनि· | ३२ | ज्येष्ठागौरीव्रतनि· |
| ९७ | आषाढपौर्णिमास्यांशिवशयनो· | २२ | श्रावणभाद्रपदामावास्याकुश· | ३३ | भाद्रशु·श्रवणद्वादशीनि· |
| ९७ | व्यासपौर्णिमानिर्णयः | २२ | पिठोरीव्रतनिर्णयः | ३४ | अगस्त्यार्घोदयनिर्णयः |
| ९७ | कर्कसंक्रमणोत्तरनदीरजोनि· | | इतिश्रावणमासकृत्यानि | १०४ | अनंतचतुर्दशीनिर्णयः |
| १०० | आषाढामावास्यायांदीपपूजा | | अथभाद्रपदमासकृत्यानि | १०५ | प्रोष्ठपद्यांऊर्ध्वत्रयीश्राद्धनि· |
| | इत्याषाढमासकृत्यानि | २३ | भाद्रशुक्लतृतीयाहरितालिका· | १०६ | अथमहालयनिर्णयः |
| | अथश्रावणमासः | २३ | गणेशचतुर्थीनिर्णयः | १०७ | भाद्रपदकृष्णकपिलाषष्ठी |
| ९८ | श्रावणेसोमवारशनिवार· | २६ | भाद्रशुक्लचतुर्थ्यांचंद्रद·निषे· | | इतिभाद्रपदमासकृत्यानि |


"Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

॥२१॥

| | | | | | |
|---|---|---|---|---|---|
| | अथाश्विनमासकृत्यानि | ४६ | कार्तिकस्नानप्रकार | ५७ | तुलासंक्रांतिनिर्णयः |
| ३४ | आश्विनशुक्लप्रतिपदिदौहित्रनि॰ | ४९ | धात्रीमूलेश्राद्धंमत्स्वेनन प्र॰ | | इत्याश्विनमासकृत्यानि |
| ३५ | नवरात्रारंभः | ५० | आकाशदीपदानविधिः | | अथकार्तिकमासकृत्यानि |
| ३६ | संक्षिप्तनवरात्रप्रयोगः | ५० | धात्रीपूजनविधिस्तन्मूलेतर्प | ५८ | कार्तिकशुक्ल१ बलिपूजनं |
| ३८ | आश्विनशुक्लमहाष्टमीनिर्णय॰ | ५१ | दीपदानादि | ५९ | कार्ति॰शु॰९ कूष्मांडदानं |
| ३८ | होमकालमंत्रइत्यादि॰ | ५२ | आश्विनकृष्णद्वादशीगोवत्स | ६० | कार्ति॰शु॰१२पारणानिर्णयः |
| ४० | कूष्मांडादिबलि | | द्वा॰१२निर्णयः पूजाविधिः | ६० | चातुर्मास्यव्रतसमाप्तिः |
| ४१ | मूलेसरस्वतीपूजन॰ | ५३ | आश्विनकृष्णा१३यमदीपः | ६१ | कार्ति॰शु॰१२विष्णुप्रबोधोत्सवः |
| ४५ | आश्विनशुक्ल८ महालक्ष्मीपू॰ | ५३ | नरकचतुर्दशीविधिः | ६१ | तुलसीविवाहविधि |
| ४६ | विजयादशमीनिर्ण॰ | ५५ | दीपावलिदिनविधिः | ६२ | कार्तिकशु॥१४वैकुंठच॰ |
| ४७ | शमीपूजाविधानं | ५६ | आश्विनकृष्णा॥३० लक्ष्मीपूजा | ६३ | अस्यामेवारुणोदये शिवपूजा |
| ४८ | आश्विनपौ॥१५लक्ष्मीइंद्रपूजा | ५७ | कुबेरपूजनमस्यामेव | ६४ | की॰१५त्रिपुरोत्सवदीपः |

॥२१॥

अनु· ॥३॥ (3A)


| | | | | | |
|---|---|---|---|---|---|
| | इतिफाल्गुनमासकृत्यानि | ९१ | अशौचनिर्णयः | १०२ | पर्वणिसमुद्रस्नानविधिः |
| | अथाधिकमासकृत्यानि | ९१ | अन्यमासपक्षित्तप्रतिनिषिः | १०८ | आश्विनशुक्लपंचम्यांउपांगल |
| ८१ | अपूपदानप्रकारः | ९२ | रजस्वलाभाषणादिदोषः | | ललितादेवीव्रतविधिः |
| ८२ | चंद्रग्रहणविधिः | | अथकल्पद्रुमंजर्यनुक्रमोऽ | १०९ | कालविभागनिर्णयः |
| ८३ | सूर्यग्रहणविधिः | | वशिष्ठकल्पानां | १०९ | गुरुशुक्रास्तयोर्वर्ज्यानि· |
| ८४ | ग्रहणेश्राद्धादिनिर्णयः | ९३ | संकष्टचतुर्थीनिर्णयः | १०९ | मेषादिसंक्रांतिषुदानविशेषः |
| ८५ | ग्रहणेनागबिंबदानहवनादि | ९३ | एकादशीनिर्णयः | ११० | उपनयनकालादिनि· |
| ८५ | ग्रहणेशांतिकप्रयोगः | ९५ | प्रदोषव्रतनिर्णयः | ११० | विवाहमासनि· |
| ८६ | ग्रहणेपीडाहरौषधिस्नानं | ९७ | सामान्यस्त्रीनतिथिनिर्णयः | ११३ | गोत्रप्रवरनिर्णयः |
| | अधिकमंत्रधेडकरूस्तोपपुता | ९७ | दशावतारजयंतीनिर्णयः | | इतिश्रीकल्पमंजर्यानुक्रमणि |
| ८९ | त्रिकालनित्यत्र्याघ्रिताति | १०० | दर्शश्राद्धनिर्णयः | | कासमाप्ता शके १७६८ आश्विन |
| ९० | अनकर्तारिप्रतिनिषेधः | १०० | दर्शवार्षिकश्राद्धादिनिर्णयः | | शुक्लचतुर्थ्यां बडोदेशाच्छापीलें |


॥३॥

| | | | | | |
|---|---|---|---|---|---|
| ६४ | कार्तिकशु० ८ गोपाष्टमी० | ६९ | मकरसंक्रांतिनिर्णयः | ७४ | शिवपंचाक्षरीमंत्रः |
| ६४ | वृश्चिकसंक्रांतिनिर्णयः | | इतिपौषमासकृत्यानि | ७५ | शिवस्तोत्रं |
| | इतिकार्तिककृत्यानि | | अथमाघमासकृत्यानि | ७८ | माघकृ० चौगणेशचतुर्थी |
| | अथमार्गशीर्षकृत्यानि | ७० | माघशु० ५ वसंतपंचमी नि० | ७९ | कुंभसंक्रांतिनि० |
| ६५ | मार्गशीर्षशु० ६ चंपाषष्ठी | ७१ | माघशु० ७ रथसप्तमी० | | इतिमाघकृत्यानि |
| ६५ | धनुःसंक्रमणनिर्णयः | ७० | माघशु० भीष्माष्टमीनि० | | अथफाल्गुनकृत्यानि |
| ६५ | धनुर्मासविधिः | ७० | माघपौर्णिमाकृत्यं | ७९ | फाल्गुनशु० १५ होलिकाप्रदीपनकृत्यं |
| | इतिमार्गशीर्षकृत्यानि | ७२ | महामाघीयोगनिर्णयः | ८१ | फाल्गुनकृ० १ वसंतोत्सवः अत्रै |
| | अथपौषमासकृत्या० | ७२ | माघकृष्ण० १३ महाशिवकामा० | | वाम्रपुष्पप्राशनं |
| ६६ | पौषशु० ११ माघस्नानारंभादि | ७२ | महाशिवरात्रिनिर्णयः | ८१ | फाल्गुनकृ० १३ वारुणी |
| ६८ | मकरसंक्रमणेतिलपात्रदानं | ७२ | मासशिवरात्रिनि० | | इयमेवशततारा० शनि० महावारुणी |
| ६९ | पौषमाघामावास्ययोरर्धोदयः | ७३ | शिवरात्रिव्रतविधिः | ८१ | मीनसंक्रांतिनिर्णयः |


Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratisthan, Mumbai.

(5A)

5A ॥अथेदं कल्प मंजर्याः प्रारंभपत्रं॥

रामचंद्रसदाशिवजोशी । चौदेश्वर याणि हस्ते

project of the Rajwade Sanshodhan Mandal, Phule and the Yashwantrao Chavan Pratishthan, Mumbai.

हरि कृत्य० ॥१॥ श्रीगणेशायनमः॥ॐनमः॥नत्वाविघ्नेशंव्यासादींश्चमुनीश्वरान्॥श्रियायुक्तंम मं०
हाविष्णुंपार्वत्यासहितंशिवं॥१॥आलोच्यबहुशोग्रंथान्कौस्तुभादीन्सतांमुदे॥ः
बापूभट्टेनविदुषाक्रियतेकृत्यमंजरी॥२॥चैत्राद्यमांतमासेषुसंतिकृत्यानिभूरिर
॥चतुर्विधानितान्याहुर्नित्यत्वादिविभेदतः॥३॥करणेतुफलंनोक्तंदोषउक्तोविलो
पने॥तानिनित्यानिवर्षादौतैलाभ्यंगविधिर्यथा॥४॥अर्द्धोदयादियोगेषुकृत्यानि
विहितानिच॥नैमित्तिकानितान्याहुर्ग्रहणादौचपर्वणि॥५॥फलप्रदर्शनंयत्रन
लोपेदोषदर्शनं॥ तानिकाम्यानिचैत्रादौप्रपादानविधिर्यथा॥६॥फलोक्तिःकरणेये
षांलोपेदोषप्रदर्शनं॥नित्यान्यपिचकाम्यानियथाजन्माष्टमीव्रतं॥७॥नित्यानां
नित्यकाम्यानांकरणंप्रतिवत्सरं॥असंभवात्तत्तदुक्तंप्रायश्चित्तंसमाचरेत्॥८॥ १॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

कृतिर्नैमित्तिकानांतु निमित्तोपस्थितास्मृतौ॥ तत्रत्यावश्यकस्यैवलोपेतंनिष्कृतिं
चरेत्॥ ९॥ यथात्यावश्यकंस्नानंग्रहणेचंद्रसूर्ययोः॥ उपोषणंत्रिरात्रादितच्चानाव
श्यकंस्मृतं॥ १०॥ काम्यानांकामतोत्पत्तौ करणंतुयथाविधि॥ तत्रारब्धविलोपेतुप्राय
श्चित्तंसमाचरेत्॥ ११॥ प्रायोत्रनित्यकृत्यानांसंक्षेपात्कालनिर्णयः॥ वक्ष्यतेतत्प्र
योगश्चशिष्टाचारानुसारतः॥ १२॥ येषांचप्रचुराचारः फलंवासम्यगीरितं॥ तेषांनैः
मित्तिकादीनां क्वचिदत्रप्रदर्शनं॥ १३॥ मासोत्रमध्यदेशेषुदर्शांतः सर्वकर्मसु॥ मा
घकार्त्तिकवैशाखस्नानेपूर्णांतईरितः॥ १४॥ अत्रचैत्रशुक्लप्रतिपन्निर्णयः॥ सा
चसंवत्सरारंभेसूर्योदयव्यापिनीग्राह्या॥ दिनद्वयेतद्व्याप्त्यभावव्याप्तौवापूर्वैव॥ यदा
तुचैत्रोमलमासोभवतितदामलमासएववत्सरारंभः॥ अत्रतैलाभ्यंगोनित्यः। वत्स

(6)

कृत्य•

॥२॥

रादौवसंतादौबलिराज्येतथैवच॥ तैलाभ्यंगमकुर्वाणो नरकंप्रतिपद्यत इतिरुद्रवशिः मं•

ष्ठोक्तेः॥ वत्सरादौचैत्रशुक्लप्रतिपदिवसंतादौ माघशुक्लपंचम्यां फाल्गुनकृष्णप्रतिपदि

च॥ बलिराज्येआश्विनकृष्णचतुर्दश्यादिदिनत्रये॥ अत्रकर्तव्यमुक्तंब्रह्मपुराणे॥ चैत्र

मासिजगद्ब्रह्माससर्जप्रथमेहनि॥ आत्मशोभाततःकार्यामंगलंभवनंतथा॥ भोजयि

त्वाद्विजान्सर्वान्सत्कृत्यसंबंधिबांधवान्॥ विशेषेणतुभोक्तव्यंकार्यस्यापिमहोत्सवः॥

ज्योतिर्निबंधे॥ गृहेगृहेध्वजाःकार्याःशक्त्याब्राह्मणतर्पणं॥ भविष्यपुराणेच॥ अ

स्यांवैनिंबपत्राणिप्राश्यसंशृणुयात्तिथिं॥ तथाचसंग्रहे॥ पंचांगंशृणुयात्तत्रनृपादि

फलसंयुतमिति॥ अत्रायमाचारानुसारेणविधिः॥ गृहमुपलेप्यरंगवल्लीतोरणादिभि

रलंकृत्यसपरिवारस्तैलाभ्यंगपूर्वकंमंगलस्नानंविधाय॥ कृतनित्यक्रियोनूतनवः ॥२

(६अ).

स्वालंकारादिभूषितोमंगलवाद्यघोषयुक्तोगृहद्वारप्रदेशेस्वशोभितंपुष्पमाला
दिभूषितमारक्तवस्त्रनिर्मितंध्वजमुच्छ्रित्य॥ ॐ ब्रह्मध्वजायनमइतिसंपूज्यप्रार्थये
त्॥ ब्रह्मध्वजनमस्तेस्तुसर्वाभीष्टफलप्रद॥ प्राप्तेस्मिन्वत्सरेनित्यंमद्गृहेमंगलंकु
रु॥ ततआरोग्यावाप्तयेनिंबपत्राणिभक्षयित्वादैवज्ञंसंपूज्यतन्मुखाद्वत्सरफल
श्रवणपूर्वकंपंचांगंश्रुत्वातंवस्त्रदक्षिणादिभिःपरितोष्यविप्रसुहृत्संबंधिबांध
वैःसहविविधमधुरपक्वान्नादियुतमन्नंभुंजीयात्॥ ॥इतिसंवत्सरारंभविधिः
॥संवत्सरेसार्द्धत्रयोमुहूर्ताः॥ ॥वराहसंहितायां॥प्रसिद्धास्तेचप्रदर्श्यंते॥प्रतिप
द्वत्सरादिर्यात्तृतीयाक्षय्यसंज्ञका॥ दशमीविजयाख्याचमुहूर्तास्त्रयईरिताः॥ प्रतिप
त्कार्तिकेशुक्लासमुहूर्तोर्द्धसंज्ञकः॥स्वयंसिद्धाइमेज्ञेयाःसर्वकार्यप्रसाधकाइति॥

(१७)

कृत्य॰

॥३॥

चैत्रमासं प्रक्रम्योक्तं भविष्यपुराणे॥ ॥प्रत्यहं धर्मघटको वस्त्रसंवेष्टितानन:॥ ब्राह्मण
स्य गृहे देय: शीतामलजल: शुचि:॥ तत्र मंत्र:॥ ॥एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मक:
॥अस्य प्रदानात्सकला मम संतु मनोरथा:॥ चैत्रशुक्लतृतीया मन्वादि:॥ एतद्दादि प्रतिसं
वत्सरं नित्यानि षण्णवतिश्राद्धान्युक्तानि॥ तेषां निर्णय:॥ प्रयोगश्च मत्कृतश्राद्धमंज
र्यां द्रष्टव्य:॥ चैत्रशुक्लाष्टमी नवमीयुक्ता ग्राह्या॥ पुनर्वसुनक्षत्रयोगे तिप्रशस्ता॥ बुधवा
सरयोगे च प्रशस्ततरा॥ नक्षत्रवासरयोगवती सप्तमीयुतापि ग्राह्या॥ तदभावे केवला
ष्टमी त्रिमुहूर्तापि परैव॥ ॥अत्र कृत्यमुक्तं हेमाद्रौ लिंगपुराणे॥ ॥अशोककलिका
श्चाष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुरिति॥ मम सर्व
दा अशोकत्वप्राप्तिद्वारा श्रीपर॰ र्थं चैत्रशुक्लाष्टम्यामशोककलिकाप्राशनं करिष्ये

मं॰

॥३॥

(७A)

तिसंकल्पः॥ प्राशनमंत्रस्तु॥ त्वामशोकवराभीष्टंमधुमाससमुद्भवं॥ पिबामिशोकसं
तप्तोमामशोकंसदाकुरु॥ इदंकाम्यं॥ चैत्रशुक्लनवमीरामनवमी॥ साद्विविधा॥ पुनर्व
सुनक्षत्रयुक्ताकेवलाचेति॥ तत्रादौकेवलायानिर्णयः॥ साचमध्यान्हव्यापिनीदशमी
युताग्राह्या॥ दिनद्वयेमध्यान्हव्याप्तौतदभावेवापरा॥ परदिनेमध्यान्हव्याप्त्यभावेपू
र्वदिनेमध्यान्हव्याप्तौपूर्वैव॥ ॥अथपुनर्वसुयुक्तायानिर्णयः॥ यदाएकस्मिन्दिनेम
ध्यान्हेपुनर्वसुयोगोन्यस्मिन्दिनेमध्यान्हंविहायपुनर्वसुयोगस्तदामध्यान्हेपुनर्वसु
युताग्राह्या॥ यदादिनद्वयेपिमध्यान्हेपुनर्वसुयोगोदिनद्वयेपिमध्यान्हंविहायैवयोगस्त
दापरैवग्राह्येतिबहवः॥ माधवमतेतुपूर्वेद्युर्मध्यान्हेपुनर्वसुयोगेपिअष्टमीविद्धाया

॥-॥-॥-॥-॥-॥-॥-॥-॥-॥-॥-॥-॥-॥

(8)

कृत्य० ॥४॥

निषेधात्॥ परदिने मध्यान्हव्याप्त्यभावेपि परैव॥ दिनद्वये मध्यान्हव्याप्त्यभावे परदि
नेत्रिमुहूर्तापि परैव॥ मुहूर्तत्रयन्यूनत्वे पूर्वैव॥ यदा दशम्यादिक्षयवशात्पारणाहे
स्मार्तैकादशीसंभवस्तदा नवमीव्रतांगपारणालोपापत्तेः स्मार्तैरष्टमी विद्धा ग्राह्या॥ वैष्ण
वैः परैवेति॥ यद्यपि मध्यान्हशब्दः पंचधा विभक्तस्य दिनस्य तृतीयभागपरस्तथापि प्रकृ
ते॥ अन्हो मध्ये वा मनोरामरामा इति कमलाकराद्युदाहृतवचनात्॥ द्वेधा विभक्तस्य
दिनस्य संधिकालवाचकोज्ञेयः॥ तादृशस्य कालस्य दुर्ज्ञेयत्वान्मध्ये निशान्होः पलविं
शतिश्चेति मुहूर्तमात्राद्युक्तज्योतिः शास्त्रमनुसृत्य विंशतिपलात्मकमध्यान्हकालाश्र
यणेन निर्णयः कर्तव्य इति दिक्॥ ॥अत्र कर्तव्यमुक्तमगस्तिसंहितायां॥ उपोषणं
जागरणं पितॄनुद्दिश्य तर्पणं॥ तस्मिन् दिने प्रकर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिरिति॥

म० ॥४॥

(8A)

अत्ररामार्चनादिसर्वंकौस्तुभादिषुद्रष्टव्यं॥ पारणंतुदशम्यांकार्यं॥ दशमींनैवलंघयेत्
इतिवचनात्॥ इदंव्रतंनित्यंकाम्यंच॥ इदंमलमासेनैवकार्यं॥ ॥इतिरामनवमीनि०॥
अथदोलोत्सवः॥ तत्रायंमत्कृतसंग्रहः॥ दोलोत्सवविधिश्चैत्रेशुक्लपक्षेप्रकीर्तितः॥आ
राध्यदेवतातिथ्यांकार्यस्तत्पूजकैःपृथक्॥ १॥ तृतीयायामुपक्रम्यमासंगौर्याःशिव
स्यच॥ तस्मिन्मुहूर्तमात्रापितृतीयापरसंयुता॥ २॥ चतुर्दश्यांन्रसिंहस्यविहितःकौ
स्तुभादिषु॥ तत्रापराण्हगायास्यापूर्वविद्धाचतुर्दशी॥ ३॥ एकादश्यांमहाविष्णोःश्री
युक्तस्यचेरितः॥ तस्मिन्नेकादशीग्राह्याद्वादशीतिथिसंयुता॥ ४॥ दोलांस्वर्णमयींरम्यं
पद्मरागादिसंयुतां॥ सुवर्णश्रृंखलायुक्तांवितानोपरिमंडितां॥ ५॥ विचित्राभरणैर्यु
क्तांप्रांततरोपितदर्पणां॥ छत्रचामरसंयुक्तांम्रदुलास्तरणैर्युतां॥ ६॥ कौशेयाच्छाः

(१)

कृत्य० ॥५॥

दितामेवं शक्तिं कुर्याद्यथाविधि ॥ अशक्तस्तु यथाशक्ति कुर्याद्धावीदिनिर्मितं ॥ ७ ॥
अत्रायं विधिः ॥ उक्तदिने देवस्य नित्यपूजां विधाय ॥ देशकालौ संकीर्त्य मम सर्वपापक्षय
पूर्वकसर्वपुण्यप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थममुकदेवस्य दोलोत्सवं करिष्ये ॥
इति संकल्प्य ॥ देवं विविधोपचारैः संपूज्य दमनकं च समर्प्य ॥ सति संभवे लौकिका
ग्निं प्रतिष्ठाप्य ॥ व्याहृतिभिराज्येनाष्टोत्तरशतमाहुती र्हुत्वा प्राच्यै नम इत्यादिमंत्रैर्लौ
किकेन चरुणा दशदिक्बलीन्दत्वा शिष्टजनैः स्तोमंत्रगीतवाद्यघंटादिघोषयुक्तो
दोलायाः पार्श्वभागे तिष्ठन्मूलमंत्रेण विश्वतश्चक्षुरिति मंत्रेण वा देवं दोलायामारो
प्यां दोलयेत् ॥ स्त्रीशूद्रौ वा नाममंत्रेण देवमारोपयेत् ॥ ॥ एतन्महिमा चोक्तो गारुडे
॥ दोलारूढं प्रपश्यंति कृष्णं कलिमलापहं ॥ अपराधसहस्रैस्तु मुक्तास्ते घूर्णने कृ

मं० ॥५

(9A)

ते॥ दोलास्थितस्य देवस्य येग्रे कुर्वंति जागरं॥ सर्वपुण्यफलावाप्तिर्निमिषेणैव जा
यते॥ स्मार्त्तोत्सर्वप्रयत्नेन दोलायात्रामहोत्सवः॥ कार्यः सर्वफलावाप्त्यै सर्वपापह
रः शुभ इति॥ अयं नित्यः॥ ऊर्जे व्रतं मधौ दोलां श्रावणे तंतुपूजनं॥ चैत्रे च दमना
रोपमकुर्वाणो व्रजत्यध इति प्राभात॥ एतन्मूलवाक्यानि कौस्तुभादौ द्रष्टव्यानि
॥यदा विघ्नवशाद्दोलोत्सवस्य मुख्यकालातिक्रमो भवति तदा गौणकालेपि कर्त्त
व्यो नित्यत्वात्॥ गौणकालस्तु मासपर्यंतं ज्ञेयः॥ मधौ शुक्लतृतीयायां जानकीर
मणं प्रभुं॥ राजोपचारैः संपूज्य मासमालालयेत्कलौ विति रामार्चनचंद्रिकायां
गारुडोदाहृतवचनात्॥ यस्तु पंचायतनपूजकस्तेन पंचानामपि तंत्रेण मुख्यदेव
तिथौ कार्यः॥ यश्चानेकदेवतापूजकस्तंत्रेण सर्वदेवतानां दोलोत्सवकरणेच्छुः॥

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१०)

कृत्य०

स्तत्कर्तृकदोलोत्सवाख्यंकर्म एकादश्यां विश्वेदेवदेवतात्वात्॥ विश्वेदेवाः सर्वेदेवा
इतिश्रुत्यासर्वासांदेवतानांकर्तुमुचितमितिगम्यते॥ ॥इतिदोलोत्सवः॥ ॥अथ मं०
॥६॥ दमनारोपः॥ तत्रायंमत्कृतसंग्रहः॥ चैत्रेमासिसितेपक्षेप्रत्यब्दंदमनार्पणं॥ वि
हितंतत्तिथीशानांक्रमात्सतिपद्यादितः॥१॥अग्नयेब्रह्मणेगौर्यैगणेशाययथाक्र
मं॥ नागेभ्यःस्कंदसंज्ञायरवयेशंकरायतु॥२॥ दुर्गायैयमधर्मायविश्वेदेवेभ्य
एवच॥ विष्णवेमदनायाथशिवायशशिनेक्रमात्॥३॥ यस्यदेवस्ययोभक्तः
सोर्पयेद्देवतातिथौ॥ सर्वेषांयदिभक्तश्चेत्सर्वास्वपिसमर्पयेत्॥४॥ अन्येभ्य
श्चार्पयेद्भक्तस्तत्तत्सिद्धतिथौयथा॥ नवम्यांरामचंद्रायेत्येवमन्यत्रचोह्यतां॥ ॥६
॥५॥ अप्रसिद्धातिथिर्यस्यत्वेकादश्यांतदर्पणं॥ विश्वेदेवपदंचापिसर्वदेव

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

परंयतः॥ ६॥ पौर्णिमायांतु सर्वेषां विहितं दमनार्पणं॥ शिवस्य तु विशेषेण तत्राह कमलाकरः॥ तत्तिथावर्पयेत्तस्मै पुनश्चैत्र्यां समर्पयेत्॥ अपिवारोपणं चैत्र्यां स्वीयतिथ्या मसंभवे॥ ८॥ पद्धागमोक्तमार्गेण दीक्षितस्तत्तिथौ यजेत्॥ अदीक्षितस्तु पूर्णायामितिपक्षत्रयं स्फुटं॥ ९॥ अस्मादौ कार्यमेवैतन्नाधिमासे कदाचन॥ नित्यत्वे वचनं त्वस्य दोलोत्सव उदाहृतं॥ १०॥ विष्णोर्दमनारोपो द्वादश्यां विहितः सतु॥ द्वादश्यां वात्रयोदश्यां कर्तव्यः पारणादिने॥ ११॥ शिवस्य दमनारोपे पूर्वविद्धा चतुर्दशी॥ प्रदोषव्यापिनी ग्राह्या पौर्णमासी दिवापरा॥ १२॥ मध्योर्न दमनारोपो भवेद्विघ्नवशात्तदा॥ वैशाखे श्रावणे भाद्रे कर्तव्यस्तत्तिथौ सितं॥ १३॥ अत्रायं विधिः॥ उक्तदिनात्पूर्वेद्युर्दमनकमानीय प्रक्षाल्य वस्त्राच्छादितं देवागारे स्मरक्षितं निधायाऽपरेद्युः प्रातः कृ[illegible] नित्यक्रियो देशका

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com